# Essence of Bhagvad Gita by Shri Yamunacharya

# ગીતાર્થ સંગ્રહ

## Document Information

Text title : gItArtha-sangrahaH of Sri yAmunAchArya

File name : gitaarthasangraha.itx

Category : gItA, giitaa, bhagavadgItA

Location : doc_giitaa

Author : Traditional

Transliterated by : http://www.srivaishnava.org/sva/alavan/gsangat.htm

Proofread by : http://www.srivaishnava.org/sva/alavan/gsangat.htm

Latest update : November 27, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગીતાર્થ સંગ્રહ

સ્વધર્મજ્ઞાનવૈરાગ્યસાધ્યભક્ત્યેકગોચરઃ ।
નારાયણઃ પરં બ્રહ્મ ગીતાશાસ્ત્રે સમીરિતઃ ॥ ૧॥

જ્ઞાનકર્માત્મિકે નિષ્ઠે યોગલક્ષ્યે સુસંસ્કૃતે ।
આત્માનુભૂતિસિદ્ધ્યર્થે પૂર્વષટ્કેન ચોદિતે ॥ ૨॥

મધ્યમે ભગવત્તત્ત્વયાથાત્મ્યાવાપ્તિસિદ્ધયે ।
જ્ઞાનકર્માભિનિર્વર્ત્યો ભક્તિયોગઃ પ્રકીર્તિતઃ ॥ ૩॥

પ્રધાનપુરુષવ્યક્તસર્વેશ્વરવિવેચનમ્ ।
કર્મધીર્ભક્તિરિત્યાદિઃ પૂર્વશેષોઽન્તિમોદિતઃ ॥ ૪॥

અસ્થાનસ્નેહકારુણ્યધર્માધર્મધિયાકુલમ્ ।
પાર્થં પ્રપન્નમુદ્દિશ્ય શાસ્ત્રાવતરણં કૃતમ્ ॥ ૫॥

નિત્યાત્માસઙ્ગકર્મેહાગોચરા સાઙ્ખ્યયોગધીઃ ।
દ્વિતીયે સ્થિતધીલક્ષા પ્રોક્તા તન્મોહશાન્તયે ॥ ૬॥

અસક્ત્યા લોકરક્ષાયૈ ગુણેષ્વારોપ્ય કર્તૃતામ્ ।
સર્વેશ્વરે વા ન્યસ્યોક્તા તૃતીયે કર્મકાર્યતા ॥ ૭॥

પ્રસઙ્ગાત્સ્વસ્વભાવોક્તિઃ કર્મણોઽકર્મતાસ્ય ચ ।
ભેદા જ્ઞાનસ્ય માહાત્મ્યં ચતુર્થાધ્યાય ઉચ્યતે ॥ ૮॥

કર્મયોગસ્ય સૌકર્યં શૈઘ્ર્યં કાશ્ચન તદ્વિધાઃ ।
બ્રહ્મજ્ઞાનપ્રકારશ્ચ પઞ્ચમાધ્યાય ઉચ્યતે ॥ ૯॥

યોગાભ્યાસવિધિર્યોગી ચતુર્ધા યોગસાધનમ્ ।
યોગસિદ્ધિસ્સ્વયોગસ્ય પારમ્યં ષષ્ઠ ઉચ્યતે ॥ ૧૦॥

સ્વયાથાત્મ્યં પ્રકૃત્યાસ્ય તિરોધિશ્શરણાગતિઃ ।
ભક્તભેદઃ પ્રબુદ્ધસ્ય શ્રૈષ્ઠ્યં સપ્તમ ઉચ્યતે ॥ ૧૧॥

ઐશ્વર્યાક્ષરયાથાત્મ્યભગવચ્ચરણાર્થિનામ્ ।
વેદ્યોપાદેયભાવાનામષ્ટમે ભેદ ઉચ્યતે ॥ ૧૨॥

સ્વમાહાત્મ્યં મનુષ્યત્વે પરત્વં ચ મહાત્મનામ્ ।
વિશેષો નવમે યોગો ભક્તિરૂપઃ પ્રકીર્તિતઃ ॥ ૧૩॥

સ્વકલ્યાણગુણાનન્ત્યકૃત્સ્નસ્વાધીનતામતિઃ ।
ભક્ત્યુત્પત્તિવિવૃધ્ધ્યર્થા વિસ્તીર્ણા દશમોદિતા ॥ ૧૪॥

એકાદશે સ્વયાથાત્મ્યસાક્ષાત્કારાવલોકનમ્ ।
દત્તમુક્તં વિદિપ્રાપ્ત્યોર્ભક્ત્યેકોપાયતા તથા ॥ ૧૫॥

ભક્તેશ્શ્રૈષ્ઠ્યમુપાયોક્તિરશક્તસ્યાત્મનિષ્ઠતા ।
તત્પ્રકારાસ્ત્વતિપ્રીતિર્ભક્તે દ્વાદશ ઉચ્યતે ॥ ૧૬॥

દેહસ્વરૂપમાત્માપ્તિહેતુરાત્મવિશોધનમ્ ।
બન્ધહેતુર્વિ વેકશ્ચ ત્રયોદશ ઉદીર્યતે ॥ ૧૭॥

ગુણબન્ધવિધા તેષાં કર્તૃત્વં તન્નિવર્તનમ્ ।
ગતિત્રયસ્વમૂલત્વં ચતુર્દશ ઉદીર્યતે ॥ ૧૮॥

અચિન્મિશ્રાદ્વિશુદ્ધાચ્ચ ચેતનાત્પુરુષોત્તમઃ ।
વ્યાપનાદ્ભરણાત્સ્વામ્યદન્યઃ પઞ્ચદશોદિતઃ ॥ ૧૯॥

દેવાસુરવિભગોક્તિપૂર્વિકા શાસ્ત્રવશ્યતા ।
તત્ત્વાનુષ્ઠાનવિજ્ઞાનસ્થેમ્ને ષોડશ ઉચ્યતે ॥ ૨૦॥

અશાસ્ત્રમાસુરં કૃત્સ્નં શાસ્ત્રીયં ગુણતઃ પૃથક્ ।
લક્ષણં શાસ્ત્રસિદ્ધસ્ય ત્રિધા સપ્તદશોદિતમ્ ॥ ૨૧॥

ઈશ્વરે કર્તૃતાબુદ્ધિસ્સત્ત્વોપાદેયતાન્તિમે ।
સ્વકર્મપરિણામશ્ચ શાસ્ત્રસારાર્થ ઉચ્યતે ॥ ૨૨॥

કર્મયોગસ્તપસ્તીર્થદાનયજ્ઞાદિસેવનમ્ ।
જ્ઞાનયોગો જિતસ્વાન્તૈઃ પરિશુદ્ધાત્મનિ સ્થિતિઃ ॥ ૨૩॥

ભક્તિયોગઃ પરૈકાન્તપ્રીત્યા ધ્યાનાદિષુ સ્થિતિઃ ।
ત્રયાણામપિ યોગાનાં ત્રિભિરન્યોન્યસઙ્ગમઃ ॥ ૨૪॥

નિત્યનૈમિત્તિકાનાં ચ પરારાધનરૂપિણામ્ ।
આત્મદૃષ્ટેસ્ત્રયોઽપ્યેતે યોગદ્વારેણ સાધકાઃ ॥ ૨૫॥

નિરસ્તનિખિલાજ્ઞાનો દૃષ્ટ્વાત્માનં પરાનુગમ્ ।
પ્રતિલભ્ય પરાં ભક્તિં તયૈવાપ્નોતિ તત્પદમ્ ॥ ૨૬॥

ભક્તિયોગસ્તદર્થી ચેત્સમગ્રૈશ્વર્યસાધકઃ ।
આત્માર્થી ચેત્ત્રયોઽપ્યેતે તત્કૈવલ્યસ્ય સાધકાઃ ॥ ૨૭॥

ઐકાન્ત્યં ભગવત્યેષાં સમાનમધિકારિણામ્ ।
યાવત્પ્રાપ્તિ પરાર્થી ચેત્તદેવાત્યન્તમશ્નુતે ॥ ૨૮॥

જ્ઞાની તુ પરમૈકાન્તી તદાયત્તાત્મજીવનઃ ।
તત્સંશ્લેષવિયોગૈકસુખદુઃખસ્તદેકધીઃ ॥ ૨૯॥

ભગવદ્ધ્યાનયોગોક્તિવન્દનસ્તુતિકીર્તનૈઃ ।
લબ્ધાત્મા તદ્ગતપ્રાણમનોબુદ્ધીન્દ્રિયક્રિયઃ ॥ ૩૦॥

નિજકર્માદિ ભક્ત્યન્તં કુર્યાત્પ્રીત્યૈવ કારિતઃ ।
ઉપાયતાં પરિત્યજ્ય ન્યસ્યેદ્દેવેતુ તામભીઃ ॥ ૩૧॥

એકાન્તાત્યન્તદાસ્યૈકરતિસ્તત્પદમાપ્નુયાત્ ।
તત્પ્રધાનમિદં શાસ્ત્રમિતિ ગીતાર્થસઙ્ગ્રહઃ ॥ ૩૨॥

---

From http://www.srivaishnava.org/sva/alavan/gsangattm
This is a 32 verse work which has covered the essence of the
Bhagavad Gita from the Shri Vaishnava point of view. Shri RAmAnuja has
followed it very closely in his gItA bhAshya.

---

*Essence of Bhagvad Gita by Shri Yamunacharya*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*